# Master of Arts Examination, 2025

**( 2nd Year, 1st Semester )**

**Sanskrit**

**Course : XV/D**

**( Judiciary in Ancient India )**

*Time* : Two Hours *Full Marks* : 30

*The figures in the margin indicate full marks.*

१. निम्नलिखितेषु **षट्** प्रश्नाः सुरगिरा देवनागर्या लिप्या च लेखनीयाः। 1×6=6

(क) किमर्थं राष्ट्रं दुर्भिक्षव्याधिपीडितं स्यादिति मनुमतानुसारं लेखनीयम्।

(ख) 'वृषलं तं विदुर्देवाः....' अत्र वृषलग्रहणं किम्?

(ग) 'चेष्टा' इत्यस्य कोऽर्थः? मनुभाष्यानुसारं लेखनीयः।

(घ) किं नाम 'रिक्थम्'?

(ङ) 'गण' इत्यस्यार्थो निरूप्यताम्।

(च) कदा पुत्रो न दद्यात् पैतृकम्?

(छ) ब्राह्मणादिरुत्तमर्णः परिक्षीणं निर्धनं ऋणनिवृत्यर्थं किं कुर्यात्?

(ज) कालिका वृद्धिः इत्यनेन किं सूचितम्?

(झ) 'चतुर्हितमि'त्यनेन केषां ग्रहणम्?

२. निम्नोक्तेषु प्रश्नेषु **चत्वारः** समाधेयाः। 6×4=24

(क) 'सभा' इत्यस्यार्थो मनुभाष्यानुसारं लेखनीयः। ब्रह्मणः सभायाः लक्षणं किम्? तत्र 'ब्रह्मणः सभा'– इत्यत्र ब्रह्म–ग्रहणं किम्? सभायां प्रवेशविषये कर्तव्यविषये च सभासदां कृते कः परामर्शः? 1+1½+½+3

(ख) प्रनष्टस्वामिकरिक्थमित्यस्य कोऽर्थः? प्रनष्टस्वामिकरिक्थस्य रक्षणग्रहणार्पणविषये मनुसम्मतविधिः आलोच्यताम्। तत्र मिथ्याप्रवृत्तस्य कृते कीदृशो दण्डः स्यात्? 1+4+1

(ग) 'अतः प्राप्तस्य प्रतिषेधो यम्।' कस्य कुत्र कथञ्च प्राप्तिः स्यात्? तस्य च प्रतिषेधे भाष्यकारेण मेधातिथिना किमुक्तम्। ½+½+2+3

(घ) आगमप्रमाणस्य गुरुत्वं विचार्यताम्। 3

सपणविवादविधिरालोच्यताम्। 3

(ङ) सबन्धके ऋणे कीदृशी वृद्धिः स्यात्? सर्वासु जातिषु स्वकृता वृद्धिः कीदृशी? चिरकालावस्थितस्य कस्य द्रव्यस्य कियती परावृद्धिः स्यात्? याज्ञवल्क्यमतानुसारम् आलोच्यताम्। 2+2+2





(च) व्यवहारस्योद्देश्यं किम्? स च कतिविधः? व्यवहारे कस्य जयः कस्य च पराजयः स्यात्? नारदस्मृतिमनुसृत्य चतुष्पाद्व्यवहारस्यार्थो निरूप्यताम्। 1+1+2+2

★★★